National Journal of Hindi & Sanskrit Research

National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2020; 1(31): 183-186
© 2020 NJHSR
www.sanskritarticle.com

डा.रामचन्द्रशर्मा
सहाचार्यः, न्यायवैशेषिकविभागे,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृत-
विश्वविद्यालयः, दिल्ली.110016

Correspondence:
डा.रामचन्द्रशर्मा
सहाचार्यः, न्यायवैशेषिकविभागे,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृत-
विश्वविद्यालयः, दिल्ली.110016

# "भारतीयबौद्धिकात्मनिर्भरतामूलँस्संस्कृतवाङ्मयम्"

डा. रामचन्द्रशर्मा

बौद्धकी आत्मनिर्भरता एव सर्वपुरुषार्थसिद्धिमूलम्। यदा व्यक्तिः समाजश्च आन्तरबाह्यप्रमेयतत्त्वविज्ञानवान भवति तदा जीवने जीवनमूल्यानां सम्यङ्निर्धारणं विधाय स्वभिलषितलक्ष्याणामधिगने समर्थो भवति। अतः भारतीयबौद्धिकात्मनिर्भरतायाः स्वरूपं किमिति वस्तुतःनिर्धारणीयं भवति। "बौद्धिकात्मनिर्भरता" नाम – "स्वगृहीतज्ञानप्रमाण्यग्रहः", "जानाति इच्छति यतते" – इति हि चेतनचेष्टाया नैसर्गिकः क्रमः, सर्वोऽपि जन्तुः स्वेष्टसाधने तन्निश्चयपूर्वकं प्रवर्त्तते, बलवदनिष्टाननुबन्धिनि कृतिसाध्ये स्वेष्टफलजनके साधनानुष्ठाने लोकस्य प्रवृत्तिर्जायमाना दृश्यते, सुखमेव पुमर्थतया सर्वेषामिष्टम्, सुखं मे स्यात्! दुःख मे न स्यात्!इति हि स्वाभाविकी सर्वचेतनासंस्थितिः। तथा च यस्य स्वेष्टसाधनविषयकं ज्ञानं प्रामाणिकं स स्वपुरुषार्थसाधनसमर्थः सन् लोके आत्मनिर्भरतया संराजते। यः खलु परम्पराप्राप्तार्षज्ञानविज्ञानं सम्प्राप्य तेन पुरुषार्थचतुष्टयसिद्धिसामर्थ्यमवाप्नोति स वस्तुत आत्मनिर्भरः सर्वाश्रयश्च सञ्जायते।

महदद्भुतमिदमचिन्त्यरचनारूपञ्जगत्! कुत आयातम्? कथमुत्पन्नम्? कुत्रस्थितम्? केन निर्मितम्? कथन्निर्मितम्? कुत इदमहर्निशमव्यक्तचेतनानां व्यक्तीभाव? के वयम्? किमस्माकं पारमार्थिकं स्वरूपम्? जन्ममृत्त्वोः पूर्वोत्तरकाले किमस्माकमस्तित्वमस्ति न वा? समग्रस्याप्यस्य दृश्यस्य किं रहस्यमिति नाना जिज्ञासाः मनसि समुत्पद्यन्ते मनीषिणाम्। अस्यैव जगद्रहस्यस्योद्घाटनाय विविधमार्गैर्मानवता सततं प्रवर्त्तमाना विद्यते। आधुनिकवैज्ञानिकचिन्तनाविष्कारैः प्रत्यहं जगत्स्वरूपं परिवर्त्तमानमिवाभाति। भौतिकसंसाधनोपकरणैः सततविकासमधिगच्छन्ती मानवता स्वस्योत्कर्षं समुपस्थापयन्ती स्वात्मानं पूर्वापेक्षया विशिष्टस्वरूपेण प्रख्यापयन्ती काञ्चिदनिर्दिष्टां दिशं प्रति सततं संसरति। पृथिवीतोऽन्तरिक्षपर्यन्तं मानवतायाः पदातिक्रमणं विकासपदाभिलाप्यं सर्वैः बुद्धिजीविभिर्दृरीदृश्यमानमस्ति। वयं सर्वेऽपि विकासपथमनुधावन्तो विकासवादप्रतिपादितमानवता-विकासधारामनुवहामोऽनुमोदयामश्च। तथा च पाश्चात्यप्रणीतं ज्ञानविज्ञानधाराया एव प्रामाण्यं सम्प्रति विश्वस्मिन् विश्वे जरीजागर्ति।

अत एव विश्वसंस्कृतिरपि पाश्चात्यायमानारहरहमनुभूयमाना दरीदृश्यते। अनुकार्यानुकर्त्रोर्मध्ये ज्ञानविज्ञानविभेदकृदेवानुकार्यानुकारिभावो समभिव्यज्यते, योऽधिकं जानाति, अधिकङ्करोति, अपेक्षया चमत्कारञ्जनयति, स एव लोके प्रामाणिकतापन्नः सन्ननुकार्यो भवति। "गतानुगतिको लोकः", "लोके त्वर्थकृतं प्राधान्यम्", "यो ह्यर्थवान् स एव सामर्थ्यवान्", "सर्वे गुणाः काञ्चनमाश्रयन्ते"[1] अतो लोकसिद्धां संस्थतिमनुवर्तमानो लोकः तादृक्समाजमनुकरोति यः बाह्यलौकिकीं चमत्कारप्रक्रियां सम्प्रदर्शयन् लोकपरिवर्तनहेतुर्भवति।



रामचन्द्रशर्मा

| | | | | |
|---|---|---|---|---|
| 45 | धूमिल की कविताओं में 'राजनीति और विरोध का स्वर'<br>पार्वती बारिक | 151-153 | | Hindi |
| 46 | जैन सिद्धांत में कारण-कार्य भाव<br>डॉ. कुलदीप कुमार | 154-156 | | Hindi |
| 47 | जूठन (खण्ड – 2) आत्मकथा में 'उपनाम' संबंधि विषमताएँ<br>दीप्ति डिगल | 157-160 | | Hindi |
| 48 | ओड़िशी संस्कृति के महत्वपूर्ण पक्ष (बीसलदेव रासो के संदर्भ में)<br>स्नेहलता दास | 161-164 | | Hindi |
| 49 | शैवधर्मस्य परिचयः<br>मोहन लाल शर्मा | 165-166 | | Sanskrit |
| 50 | Great living food habits from yogic scriptures<br>Dr. T. Shivakumar | 167-172 | | English |
| 51 | कारक-प्रकरणे अर्थविभक्तिः<br>Pradip Mandal | 173-179 | | Sanskrit |
| 52 | सुसंहतभारतनाटके सप्तप्रकृतयः<br>P. Swapna Priya | 180-182 | | Sanskrit |
| 53 | भारतीयबौद्धिकात्मनिर्भरतामूलँस्संस्कृतवाङ्गयम्<br>डा. रामचन्द्रशर्मा | 183-186 | | Sanskrit |

रामचन्द्र शर्मा

National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2020; 1(30): 146-149
© 2020 NJHSR
www.sanskritarticle.com

डा.रामचन्द्रशर्मा
सहाचार्यः, न्यायवैशेषिकविभागे,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृत-
विश्वविद्यालयः, दिल्ली.110016

Correspondence:
डा.रामचन्द्रशर्मा
सहाचार्यः, न्यायवैशेषिकविभागे,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृत-
विश्वविद्यालयः, दिल्ली.110016

# योगसिद्धिमूला यमाः

**डा. रामचन्द्रशर्मा**

भारतीयदर्शनेषु योगदर्शनम् अत्यन्तमहत्त्वपूर्णं व्यावहारिकञ्चास्ति। दर्शनमिदं सर्वेषु आस्तिकदर्शनेषु सूत्रमिव अनुस्यूतं विभाति, यतोहि सर्वाणि दर्शनानि स्व-स्वदृष्ट्या प्रमेयस्वरूपव्याख्यानं विधाय तत्त्वसाक्षात्कारार्थं योगानुष्ठानमेव अपरिहार्यतया विधेयं विज्ञापयन्ति। महर्षिपतञ्जलिना समाधिपादे समाधिरूपस्य साध्ययोगस्य वर्णनं विधाय द्वितीये साधनपादे साधनरूपस्य अष्टाङ्गयोगस्य समुपवर्णनं विहितम्। योगाङ्गानि च इमानि –

"यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि"।[1]

एतेषु अष्टाङ्गेषु प्रारम्भिकौ यमनियमौ सर्वाधारभूतौ, यमनियमाभ्यां विना शेषाङ्गानां अनुष्ठेयता न वास्तविकफलसाधिका, अतः यमानियमानुष्ठानपूर्वकमेव आसनप्राणायामादियोगाभ्यासः वस्तुतः फलजनकः भवति। तत्र यमानां स्वरूपं महर्षिणा यथा विज्ञापितं तन्निम्नलिखितरूपेणम विज्ञेयम् –

**1).यमाः-**

**"अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः"**[2]

एते पञ्चयमाः सद्यः अन्तःकरणशुद्धिपूर्वकं सकलसिद्धिहेतुभूताः। "यम"–शब्दः "यम संयमने"[3] इत्यस्माद्धातोः निष्पन्नं भवति, तस्यार्थोऽस्ति "निवृत्तिः"। "यमयन्ति इति यमाः"।[4] एतद्व्युत्पत्त्यनुसारं यमसाधना निवृत्तिमूला विद्यते। जाबालदर्शनोपनिषदि दश यमाः विज्ञापिता। तद्यथा–

**अहिसा सत्यमस्तेयं ब्रह्मचर्यं दयार्जवम्।**
**क्षमा धृतिः मिताहारः शौचञ्चैव यमा दश।।**[5] इति

तत्र दयादीनां अहिंसामूलत्वाद् एवं शौचादीनां नियमेषु परिगणनीयत्वात् महर्षिपतञ्जलिना यमानां संख्या पञ्चपरिमितैव विज्ञापिता। एतेषां क्रमिकस्वरूपं यथादर्शनं इत्थं विज्ञेयम्।

**अहिंसा –**

अहिंसा वस्तुतः सर्वेषां धर्माणां मूलाधारः अस्ति, तथाह्युक्तं – "अहिंसा परमो धर्मः" इति। श्रुतिरपि निगदति – "मा हिंस्यात् सर्वा भूतानि" इति। महर्षिव्यासः अहिंसास्वरूपं सम्प्रतिपादयन् निगदति – **"तत्राहिंसा सर्वथा सर्वदा सर्वभूतानामनभिद्रोहः"**[6] इति। अहिंसायाः सामान्यरूपेणार्थो विद्यते – कस्यापि प्रणिनः प्राणव्यापादनव्यापाराभावः। सर्वेषु धर्मेषु अहिंसाया स्थानं सर्वोपरि विद्यते।

महर्षिव्यासानुसारं सर्वान् प्रणिनः प्रति सर्वेषु कालेषु सर्वप्रकारेण द्रोहत्यागभावनैव अहिंसा विज्ञेया। अनेन प्रकारेण अहिंसायाः क्षेत्रमत्यन्तव्यापकं विद्यते। अग्रे वर्णनीयानां सत्यादियमानां मूले अहिंसैव विद्यते। अहिंसासिद्ध्यर्थमेव तेषां प्रतिपादनं विद्यते। तद्यथोक्तम् –

**"उत्तरे च** यमनियमास्तन्मूलास्तत्सिद्धिपरतयैव **तत्प्रतिपादनाय प्रतिपाद्यन्ते"**।[7] इति

हिंसा च त्रिविधा – कृता, कारिता, अनुमोदिता च। स्वयं हिंसा करोति, अन्यमाध्यमेन कारयति, अथवा अन्यकृताया हिंसाया अनुमोदनं करोति सा सर्वाऽपि हिंसैव। तद्यथोक्तम् - **"हिंसादयः**



रामचन्द्र शर्मा

| | | | | |
|---|---|---|---|---|
| 32 | श्रीपुरुषोत्तमसंहिताप्रशस्तिः<br>Dr. P.T.G. Ranga Ramanujachyulu | 121-124 | | Sanskrit |
| 33 | पर्युदासः<br>Dr. T.S.R. Narayanan | 125-127 | | Sanskrit |
| 34 | वृत्तिसामान्यलक्षणस्य विमर्शः<br>Dr. G. Sireesha | 128-130 | | Sanskrit |
| 35 | Traits of Personality in the Rāmāyaṇa<br>Dr. P. Srinivasa Krishna Reddy | 131-134 | | English |
| 36 | कारक-प्रकरणे उपपदविभक्तिः<br>Pradip Mandal | 135-139 | | Sanskrit |
| 37 | पञ्चाङ्ग का महत्त्व<br>डा. के.टि.वि. राघवन् | 140-142 | | Hindi |
| 38 | ऐतिहासिक परिप्रेक्ष्य में संगीत (वैदिककाल)<br>डॉ. सुषमा शुक्ला | 143-145 | | Hindi |
| 39 | योगसिद्धिमूला यमाः<br>डा. रामचन्द्रशर्मा | 146-149 | | Sanskrit |

ISSN : 2350-0700

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य पुनरीक्षिता सन्दर्भिता शोधपत्रिका
A Peer Reviewed Research Journal of Shree Somnath Sanskrit University

# शोधज्योतिः
# Śodhajyotiḥ

वर्षम् - ०२ अङ्कः-०२ जनवरी-दिसम्बर-२०२०

*Chief Editor*
Prof. Gopabandhu Mishra

*Managing Editor*
Prof. Vinod Kumar Jha

*Editors*
Prof. Archana Kumari Dubey
Dr. Janakisharan Acharya
Dr. Kartik Pandya

श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

शोधज्योतिः Śodhajyotiḥ वर्षम् - ०२ अङ्कः-०२ जनवरी-दिसम्बर-२०२०

# विषयानुक्रमणिका


१. अलङ्काराणां स्वरूप-विभाग-ध्वनित्व-वाच्यत्वविमर्शः - प्रि. डॉ. नरेन्द्रकुमार पण्ड्या १

२. "यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते" परिभाषार्थविमर्शः - प्रो. विनोद कुमार झा १७

३. माण्डूक्योपनिषत्प्रणवात्मविज्ञानम् - डॉ. रामचन्द्र शर्मा २७

४. साम्प्रतं मानवस्य विसङ्गत्यां संस्कृतस्य योगदानम् - डॉ. महेन्द्रकुमार अं. दवे ३३

५. विक्रमोर्वशीये उर्वश्याः मानवीकरणम् - डॉ. डायालाल मा. मोकरिया ३७

६. न्याय-वेदान्तदर्शनयोः साधनचतुष्टयविमर्शः - डॉ. जानकीशरणः आचार्यः ४१

७. आधुनिकं काव्यप्रयोजनम् - जिगरः एम. भट्टः ४९

८. पदविधित्वं तत्त्रत्या वृत्तिश्च - सुश्री विदुषी बोल्ला ५५

९. श्रीसत्सङ्गिजीवनग्रन्थानुसारेण स्त्रीणां स्वात्रन्त्र्यं शिक्षा च - साधु लक्ष्मणप्रकाश दासः ६३

१०. भार्गवराघवीये महाकविरामभद्राचार्यस्य स्वाभिनवभाष्यनैपुण्यम् - डॉ. लक्ष्मीकान्त षडङ्गी ६७

११. प्रस्थानत्रयी स्वामिनारायण भाष्य निरूपित अक्षरपुरुषोत्तम दर्शन का जीवन पर प्रभाव -डॉ. साधु आत्मतृप्तदासः ७७

१२. नागेशकृतायां परमलघुमञ्जूषाख्यः स्फोटनिरूपणम् - हर्षलः भट्टः ९१

१३. ज्योतिषदर्शनसूत्राणि - अङ्कुर नागपालः ९७

१४. कालिदासीयकाव्येषु ज्ञानविज्ञानचिन्तनम् - डॉ. पुष्कर आनन्दः १०९


रामचन्द्र शर्मा

वर्षम् - ०२ अङ्कः - ०२
जनवरी-दिसम्बर, २०२०

शोधज्योतिः
ISSN-2350-0700

# माण्डूक्योपनिषत्प्रणवात्मविज्ञानम्

डॉ. रामचन्द्र शर्मा[1]

अनादिकालात्प्रवर्तमानमिदं जगत् स्वकीयेन नवनवायमानेनाद्भुतस्वरूपेण विश्वस्वरूपपरिचिन्तकानां मनीषिणां मानसे महदाश्चर्यं समुत्पादयत् संविभ्राजते। "दृग्दृश्यभावेन" प्रतीयमानस्यास्याचिन्त्यरचनारूपत्वम्पुरस्कृत्य भगवता श्रीजगद्गुरुणा समुदीरितम् -

**"आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद् वदति तथैव चान्यः।**
**आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित्॥**[2] इति।

"दृक्" - "प्रत्यगात्मा" - "द्रष्टृभावापन्नः", "दृश्यम्" - "अनात्मा" - "आत्मसंश्लिष्टं जगत्", "दृष्टि" - "ज्ञान-विज्ञानम्"।

प्रत्यक्षतोऽनुभूयमानमस्ति यद्देहसम्बद्धः कश्चित् प्रमाता "अहम्" इति प्रत्ययविमर्शतया आत्मत्वेनात्मानमनुभवन् प्रमेयत्वेन प्रतीयमानस्यास्य दृश्यरचनाप्रपञ्चरूपस्य प्रमितिमनुतिष्ठन् यथेष्टान् विषयानाददानः कर्तृत्वभोक्तृत्वापन्नः सन् संसरन् राजते।

"कौऽसौ? कुत आयातः? कथमुत्पन्नः? केनोत्पन्नः? किमस्य वास्तविकं स्वरूपम्? कथं संसरति? कास्य पारमार्थिकी गतिः" इति"।

एवमेव - प्रज्ञावतां दृश्यविषयेऽपि - "किमिदं? कुतः इदम्? कथमिदम्? केनेदम्? वास्तविकमवास्तविकं वेति" - जिज्ञासाः सञ्जायन्ते।

अत्र विषये भगवती श्रुतिर्निगदति - "**ब्रह्मैवेदं सर्वम्**", **सर्वमिदमयमात्मा**" - इति। अत एव आत्मबोधायैव विशेषेण प्रचोदयति - "**आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः। आत्मनो वा अरे दर्शनेन श्रुत्या मत्या विज्ञानेनेदं सर्वं विज्ञातम्।**[3]" इति।

---

[1] सहाचार्यः, श्रीलालबहादुरशास्त्री-राष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली।

[2] श्रीमद्भगवद्गीता-२.२९

[3] बृहदारण्यकोपनिषत्, २.४.५

रामचन्द्र शर्मा

UGC- CARE Listed ISSN : 0974-8946

अनुसन्धान-प्रकाशन-विभागीया त्रैमासिकी शोध-पत्रिका

# शोध-प्रभा

(A REFEREED & PEER- REVIEWED QUATERLY RESEARCH JOURNAL)

45 वर्षे प्रथमोऽङ्कः ( जनवरीमासाङ्कः ) 2020

प्रधानसम्पादकः

**प्रो.रमेशकुमारपाण्डेयः**

कुलपतिः

सम्पादकः

**प्रो.शिवशङ्करमिश्रः**

शोधविभागाध्यक्षः

सहसम्पादकः

**डॉ.ज्ञानधरपाठकः**

शोधसहायकः

**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**

नवदेहली-110016

## हिन्दी विभाग


| | | | |
|---|---|---|---|
| 13. | आनन्दब्रह्ममीमांसा | डॉ. रामचन्द्रशर्मा | 82-93 |
| 14. | वेदों में विश्वशान्ति का सन्देश | डा कमलाकान्त मिश्र | 94-100 |
| 15. | संस्कृत वाङ्मय में विटप विधान | डॉ. तारेश कुमार शर्मा | 101-107 |
| 16. | महर्षि पतंजलि द्वारा प्रदत्त अष्टांग योग की वर्तमान समय में प्रासंगिकता/उपादेयता | श्रीमती मीना देवी एवं डॉ० श्रीमती गीता परिहार | 108-115 |
| 17. | याज्ञवल्क्यस्मृति में आश्रम व्यवस्था की समीक्षा | डॉ. अशोक कुमार | 116-121 |
| 18. | नाट्य-कार्यावस्थानिरूपण | डॉ. मुकेश कुमार मिश्र | 122-137 |
| 19. | व्याकरणसुधानिधि के आलोक में वाऽसरूपविधि का परिशीलन | श्री भूपेन्द्र एवं डॉ. सत्यपाल सिंह | 138-146 |
| 20. | वैदिक वाङ्मय में वर्णित कृषि शिक्षा | डॉ. शशिशेखर मिश्र | 147-152 |

UGC - CARE Listed
जनवरी-मार्च, 2020

शोधप्रभा
वर्ष : 45, प्रथमोऽङ्कः

# आनन्दब्रह्ममीमांसा

डॉ. रामचन्द्रशर्मा

'आनन्द'!! - सृष्टि का मूल! स्वतः सिद्धसत्ता! स्वतः सिद्धचैतन्य! समग्र विश्व का केन्द्र! प्रत्येक विधा में अभिव्यक्त रस! चराचरजगत्स्पन्दन का मूलबिन्दु! अनन्त अभिव्यक्तियों के रूप में उच्छलित ज्योतिकलश! मधुमयी उल्लाससरिता का मूलोद्गम! रसस्वरूप स्वयम्प्रकाश परमात्मा! श्रुति निर्दिष्ट करती है-

**विज्ञानमानन्दं ब्रह्म, रातेर्दातुः परायणं, तिष्ठमानस्य तद्विदः।**[1]

**आनन्दो ब्रह्मेति व्यजानात्। खल्विमानि भूतानि जायन्ते,**
**आनन्देन जातानि जीवन्ति, आनन्दं प्रयन्त्यभिसंविशन्ति।**[2]

अतः यह जगत् आनन्द का एक विशाल सागर है, जिसमें 'षड् रस' एवं 'नव रस' के रूप में आनन्द की तरङ्गें उच्छलित होती हुई जीवनवेलातट से टकराकर सुखानुभूतियों के आकार में विखर रही हैं। इसी सरित्पति से आत्मसूर्य द्वारा बाष्पायित कादम्बिनी के रूप में घिरते भावमेघ प्रेमामृतरस की वर्षा करते हुए उदात्तजीवनमूल्यरूपी हिमशृङ्गों से आनन्द-निर्झरिणियों को हृदय धरा पर कल्लोलायित करते हैं और जग उठता है एक ऐसा 'वेणुनाद' जिसमें डूबकर मन स्वतः सिद्धभाव से पूर्णता का बोध करता हुआ समुद्घोष कर उठता है-

**ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते।**
**पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।**[3]

वह पूर्ण है! क्योंकि 'आनन्द' की **'पराकाष्ठा'** है! **'स्वयम्प्रकाश'** **'दृक्'** के रूप से शाश्वतभाव से विराजमान है! यह भी पूर्ण है! क्योंकि 'धर्मार्थकामरूप' 'त्रिवर्ग' के पूर्णताबोध को उद्भावित करता हुआ। 'परस्परभावन' की प्रक्रिया से निःसृत **'शाश्वतप्रेमामृतरस'** से आप्यायित है! एक ही सत्ता के परस्पराधिष्ठित दो स्वरूप हैं! पूर्ण से ही पूर्ण अभिव्यक्त हो सकता है, अपूर्ण पूर्ण को कैसे अभिव्यक्त करेगा। अपूर्ण एवं पूर्ण में विरोधिता है। अतः पूर्ण से ही पूर्ण अभिव्यक्त है। **'बिम्ब-प्रतिबिम्बभाव'** से दोनों की स्वरूप सत्ता है! अत एव दोनों ही

*सहायकाचार्य न्यायवैशेषिक विभाग, श्री. लाे. ब. शा. रा. सं. वि., नई दिल्ली- 110016

1. बृहदारण्यकोपनिषद्- 3/9/28
2. तैत्तिरीयोपनिषद्- 3/6

UGC- CARE Listed

ISSN : 0974-8946

अनुसन्धान-प्रकाशन-विभागीया त्रैमासिकी शोध-पत्रिका

# शोध-प्रभा

(A REFEREED & PEER-REVIEWED QUATERLY RESEARCH JOURNAL)

44 वर्षे चतुर्थोऽङ्कः (अक्टूबरमासाङ्कः) 2019 ई.

प्रधानसम्पादकः

**प्रो.रमेशकुमारपाण्डेयः**

कुलपतिः

सम्पादकः

**प्रो.शिवशङ्करमिश्रः**

शोधविभागाध्यक्षः

सहसम्पादकः

**डॉ.ज्ञानधरपाठकः**

शोधसहायकः

रामचन्द्र शर्मा

**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्**

(मानितविश्वविद्यालयः)

नवदेहली-110016

# विषयानुक्रमणिका

## संस्कृतविभागः


| | | |
|---|---|---|
| 1. पूर्वोत्तरमीमांसादर्शनयोर्देवतातत्त्वम् | प्रो. रामानुज उपाध्यायः | 1-4 |
| 2. विशिष्टाद्वैतमते ब्रह्मणः सर्वशब्दवाच्यत्वम् | प्रो. के. अनन्तः | 5-9 |
| 3. न्यायदर्शनीयविशिष्टशक्तिवादविमर्शः | डॉ. रामचन्द्रशर्मा | 10-16 |
| 4. विलियमवर्ड्स्वर्थप्रतिपादितानां साहित्यिकसमीक्षासिद्धान्तानां विमर्शः | डॉ. सुमनकुमारझाः | 17-26 |
| 5. बौद्धशिक्षायां मानवधर्मः | डॉ. ऋषिराजः | 27-31 |
| 6. 'जानकीजीवन' महाकाव्ये युगबोधविमर्शः | डॉ. दिनेशकुमारगर्गः | 32-38 |
| 7. पुराणेषु वृक्षायुर्ज्ञानम् | श्रीखेमराजरेग्मी | 39-43 |
| 8. प्राच्यपाश्चात्यमतयोरयनांशस्वरूपम् | श्रीअरुणशर्मा | 44-47 |
| 9. आचार्यविश्वनाथकृतध्वन्यालोकमतखण्डनस्य लोचनदिशामण्डनम् | श्रीरविकान्तो भारद्वाजः | 48-52 |

UGC - CARE Listed
अक्टूबर-दिसम्बर, 2019

शोधप्रभा
वर्ष : 44, चतुर्थोऽङ्कः

# न्यायदर्शनीयविशिष्टशक्तिवादविमर्शः

डॉ.रामचन्द्रशर्मा*

"प्रमाणैरर्थपरीक्षणं न्यायः"[1] प्रमाकरणं प्रमाणं, यथार्थानुभवः प्रमा, प्रमाणानि चत्वारि। तद्यथोक्तं महर्षिणा गौतमेन-

"प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि"[2]

तत्र प्रत्यक्षप्रमाकरणं प्रत्यक्षं, इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्। तत्र इन्द्रियाणि करणानि, सन्निकर्षाः व्यापाराः, प्रत्यक्षप्रमा फलम्। अनुमितिकरणमनुमानम्। परामर्शजन्यं ज्ञानमनुमितिः। व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः। साहचर्यनियमो व्याप्तिः। व्याप्यस्य पक्षवृत्तित्वं पक्षधर्मता। अत्र व्याप्तिज्ञानं करणं, परामर्शो व्यापारः, अनुमितिः फलम्। उपमितिकरणमुपमानम्। संज्ञासञ्ज्ञिसम्बन्धज्ञानमुपमितिः। अत्र सादृश्यज्ञानं करणं, अतिदेशवाक्यार्थस्मरणं व्यापारः, उपमितिः फलम्। शाब्दप्रमाकरणं शब्दः, शाब्दप्रमा च वाक्यार्थबोधरूपा, तत्र पदज्ञानं करणं वृत्त्या पदजन्यपदार्थोपस्थितिर्व्यापारः, पदार्थान्वयबोधरूपा शाब्दप्रमा फलम्। तद्यथोक्तम्-

**पदज्ञानन्तु करणं द्वारं तत्र पदार्थधीः।**
**शाब्दबोधः फलन्तत्र शक्तिधीः सहकारिणी।।**[3]

पदपदार्थसम्बन्धरूपा वृत्तिः शक्तिर्लक्षणा च।

सर्वोऽपि व्यापारः शब्दप्रयोगात्मक एव। भाषयैव लोव्यवहारः प्रचलति। तद्यथोक्तम्-

**इह शिष्टानुशिष्टानां शिष्टानामपि सर्वथा।**
**वाचामेव प्रसादेन लोकयात्रा प्रवर्तते।।**
**इदमन्धतमः कृत्स्नं जायते भुवनत्रयम्।**
**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।**[4]

तथाच शब्दप्रमाणमत्यन्तमहत्त्वपूर्णं तच्च आप्तवाक्यरूपं, आप्तो यथार्थवक्ता, आकांक्षादिपदसमूहो वाक्यं, शक्तं पदम्। साधुपदनिरूपिता शक्तिरर्थे भवति! सा चेश्वरेच्छास्वरूपिणी! ज्ञानेच्छाकृतयः सविषयका भवन्ति! तथा च विषयतासम्बन्धेन यथा ज्ञानं विषये तिष्ठति तथैव इच्छापि विषये तिष्ठति! "अस्मात् पदादयमर्थो बोद्धव्यः"

---

*सहाचार्यः- न्यायवैशेषिकविभागः, श्री.ला.बा.शा. रा. स. वि. नवदेहली-110016

1. न्यायभाष्यम्। (1/1/1), 2. न्यायदर्शनम् (1/1/3)

3. कारिकावली (शब्दखण्डः1), 4. काव्यादर्शः- (1/3-4)

National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2021; 1(36): 173-176
© 2021 NJHSR
www.sanskritarticle.com

डा.रामचन्द्रशर्मा
सहाचार्यः, न्यायवैशेषिकविभागे,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृत-
विश्वविद्यालयः, नईदिल्ली.110016

Correspondence:
डा.रामचन्द्रशर्मा
सहाचार्यः, न्यायवैशेषिकविभागे,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृत-
विश्वविद्यालयः, नईदिल्ली.110016

# योगदर्शने नियमस्वरूपम्महत्वञ्च

डा. रामचन्द्रशर्मा

पातञ्जलयोगदर्शनं भारतीयदर्शनेषु अतीव महत्त्वपूर्णं व्यावाहरिकञ्चास्ति। दर्शनमिदं सर्वेषु दर्शनेषु निदिध्यासनरूपेण अनुगतं विद्यते। आत्मस्वरूपदर्शनमेव वस्तुतः योगः, तद्यथोक्तम् –

**"योगश्चित्तवृत्तिनिरोधः", "तदा द्रष्टुः स्वरूपेवस्थानम्",**[1] इति। स्वरूपावस्थितिरेव आत्मदर्शनरूपिणी समाधिरूपं योगं व्यञ्जयति, अतः योगदर्शनं योगाङ्गानुष्ठानेन सर्वदुःखात्यन्तनिवृत्तिरूपं कैवल्यं परमं पुरुषार्थतया समुपस्थापयति। आष्टाङ्गयोगः यथा –

**"यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि"।**[2] **इति**

अत्र यमनियमौ आधारभूतौ, यमाः पञ्च – **"अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः"**[3] एते सार्वभौमा महाव्रतरूपेण सर्वदा संग्राह्या इति योगदर्शननिर्देशः। एतेषां अनुष्ठानेन योगसिद्धिः सर्वविश्वलोकसौख्यं च सम्पद्यते। यथा यमाः तथैव नियमाः अपि योगसिद्धिमूलाः, एतेषां स्वरूपं निम्नलिखितरूपेण संग्राह्यम्।

**नियमाः–**

नियमाः अपि पञ्च। तद्यथोक्तं -

**"शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः"।**[4]

"नियमयन्ति प्रेरयन्ति इति नियमाः"[5] इति व्युत्पत्त्यनुसारं नियमाः प्रवृत्तिमूलका भवन्ति। "नित्यं कृत्रिमं यत्कर्म स नियमः"।[6] याज्ञवल्क्यस्मृतौ नियमानां विवेचनं निम्नलिखितप्रकारेण विहितम् –

**"स्नानं मौनोपवासेज्यास्वध्यायोपस्थनिग्रहाः।**
**नियमा गुरूशुश्रूषा शौचाक्रोधाप्रमादता"।।**[7]

विष्णुपुराणेपि –

**"स्वाध्यायशौचसन्तोषतपांसि नियतात्मवान्।**
**कुर्वीत ब्रह्मणि तथा परस्मिन् प्रवणं मनः"।।**[8]

जावालदर्शनोपनिषदि –

**"तपः सन्तोषमास्तिक्यं दानमीश्वरपूजनम्।**
**सिद्धान्तश्रवणं चैव ह्रीर्मतिश्च जपोव्रतम्"।।**[9] **इति**

महर्षिपतञ्जलिना प्रोक्तेषु निम्नलिखितेषु पञ्चसु नियमेषु वस्तुतः सर्वेषामन्तर्भावो भवति। एतेषां स्वरूपमित्थं विज्ञेयम्।

**शौचः–**

शौचं पवित्रता शुद्धिः। तच्च बाह्यमाभ्यन्तरञ्च। तत्र मृत्तिकाजलादिभिः शरीरशुद्धिः एवं पवित्रभोजनञ्च बाह्यं शौचम्। आभ्यन्तरञ्च चेतसः शुद्धिः, सा च रागद्वेषादिदोषपरिहारेण जायते।

तद्यथोक्तं भाष्यकारेण – **"शौचं मृज्जलादिजनितं मेध्याभ्यवहरणादि च बाह्यम्, आभ्यन्तरं**



रामचन्द्र शर्मा

Volume 36 (May – June , 2021) – National Journal of Hindi & Sanskrit Research

| | | | | |
|---|---|---|---|---|
| 46 | गंगा की ऐतिहासिकता<br>पुरन चंद कापड़ी | 157-158 | | Hindi |
| 47 | जीवन्मुक्तिदशायामज्ञानावस्थितिविमर्शः<br>कुलदीप चन्द्र | 159-161 | | Sanskrit |
| 48 | Science In Kavyas Of Sanskrit<br>G. Dhananjaya Naidu | 162-165 | | English |
| 49 | समकालीन कविता में राजनीतिक चेतना<br>डॉ.ज्योति रानी | 166-168 | | Hindi |
| 50 | ग्रहाणां चारवशात् सामाजिकपरिवर्तनम्<br>डा. के.टि.वि. राघवन् | 169-172 | | Sanskrit |
| 51 | योगदर्शने नियमस्वरूपम्महत्वञ्च<br>डा. रामचन्द्रशर्मा | 173-176 | | Sanskrit |

National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2021; 1(37): 204-207
© 2021 NJHSR
www.sanskritarticle.com

डा.रामचन्द्रशर्मा
सहाचार्यः, न्यायवैशेषिकविभागे,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृत-
विश्वविद्यालयः, नईदिल्ली.110016

Correspondence:
डा.रामचन्द्रशर्मा
सहाचार्यः, न्यायवैशेषिकविभागे,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृत-
विश्वविद्यालयः, नईदिल्ली.110016

# "न्यायदर्शने ईश्वरवादः"

**डा. रामचन्द्रशर्मा**

विश्वज्ञानविज्ञादृष्टिरेव दर्शनम्। दर्शनानि द्विविधानि, आस्तिकानि नास्तिकानि च। आस्तिकानि वेदप्रामाण्यवादीनि, नास्तिकानि तदप्रामाण्यवादीनि। "अस्ति-नास्ति दिष्टं मतिः" – इति पाणिनिनिर्देशानुसारम्, "अस्ति दिष्टं – भागधेयं – कर्म कर्मफलञ्च इति मतिर्यस्य स आस्तिकः"। "नास्ति तदिति मतिर्यस्य स नास्तिकः"। आस्तिकमतेन कर्म-कर्मफलयोरङ्गीकारेण तदधिष्ठातृतया ईश्वरसत्ता स्वीकार्या, अन्यथा कर्मवादसिद्धन्तो नैव सङ्गमयितुं शक्यते। अत एव महर्षिगौतमेन सम्प्रोक्तम्-

**ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात्**[1]

तात्पर्यमिदं यत् – जगत्कारणतया ईश्वरः अङ्गीकरणीय एव, अन्यथा जगद्व्यवस्थाया उपपत्तिरेव न सम्भवति। ईश्वरो जगत्कर्तृतया कुतोऽङ्गीकरणीय? इति जिज्ञासायां महर्षिगौतमः समाधानं प्रददाति! "पुरुषकर्माफल्यदर्शनात्" -- इति। पुरि शेते इति पुरुषो जीवः, देहेन्द्रियात्मकायां पुरि शेते-स्वात्मवास्तविकस्वरुपमननुसन्दधान आस्ते इति पुरुषः! स चानित्येच्छाकृतिमान् अल्पज्ञः सुखदुःखात्मककर्मफलसेवी जन्मतः लयं यावत् सततं संसरन् आत्मश्रेयःकामो पुरुषार्थाय प्रवर्तमानो आत्मानमनुसन्दधानः सति स्वरूपविज्ञाने स्वरूपसत्तामवगाहते। स सुखमेवमेच्छति, नतु दुःखम्! अनुकुलवेदनीयत्वाद् वस्तुतः सुखस्यैव पुरुषार्थता, तदर्थमेव धर्मार्थकामानन्विष्यन् तत्र प्रवर्तमानो काम्यविषयानादातुकामो यथायोग्यं चेष्टते। कदाचित्सुखमवाप्नोति, कदाचिदकाम्यमानं दुःखमपि हठाज्जीवने समापतति। प्रतिकूलवेदनीयत्वाद्दुःखमनिष्टं, तथापि तस्य भोगो भवत्येव, तथा चेदमायाति यत् सः स्वकर्मफलभोगे स्वतन्त्रो नास्ति। यदि स्वतन्त्रः स्यात्, स्वेच्छया सुखमेवोपभुञ्जीत, न च शक्तः, अतः कस्यचिदधिष्ठान एव तस्येयं कर्मफलभुक्तिरङ्गीकरणीया। यो हि तस्याधिष्ठाता स एव जगत्कर्त्ता ईश्वर इति विज्ञेयम्। तस्य च कार्यमात्रं प्रति साधारणकारणता विज्ञेया! तद्यथा –

**ईशस्तज्ज्ञानयत्नेच्छाः कालोऽदृष्टं दिगेव च।**
**प्राक्प्रतिबन्धकाभावौ कार्ये साधारणाः स्मृताः।।**[2] इति

अत्र नास्तिकाः प्रतिवक्तुं शक्नुवन्ति यत् – प्रकृत्यैव सर्वं संसरति ! प्रकृतिकृत एव देहादिसङ्घातः, देह एव आत्मा, देहातिरिक्ते आत्मनि प्रमाणाभावात्, कर्मवादसिद्धान्त एवासङ्गतः। तथा हि जन्मान्तराभावात् न परलोकादिगमनम्, इहलोके एव तत्तत्कर्मभिः तत्तत्फलं प्राप्यते, दुःखादिकं सर्वं स्वभावसिद्धम्, तन्निराकरणाय यथायोग्यं लौकिकसाधनैरेव प्रवर्तितव्यम्। परलोकाभावाद् अलौकिकं परलोकसाधनमपि नास्ति। तथा च **"अदृष्ट"**-संज्ञकं **"धर्माधर्म"**-रूपं लोकोत्तरं किमपि कारणं नास्ति, यदधीनं पुरुषकर्मफलं स्वर्गादिरूपं, जात्यायुर्भोगादिरूपं वा सम्भवेत्। तथा हि आभाणकम् –



रामचन्द्र शर्मा

| | | | | |
|---|---|---|---|---|
| | socio-cultural linkages to human rights<br>Rajasree Roy | 179 | | |
| 46 | पञ्चतन्त्रे व्यवहाररीतिः<br>Lanka S K Mallikarjuna Prasad | 180-182 | | Sanskrit |
| 47 | श्रीमद्भागवत विष्णुपुराणयोः शापवृत्तान्तानामध्ययनम्<br>M. Sumithra | 183-185 | | Sanskrit |
| 48 | गंगा की पौराणिकता<br>पुरन चंद कापड़ी | 186-190 | | Hindi |
| 49 | Critical Astrological Evaluation of Epidemic Diseases WSR to Corona Pandemic<br>Mrs. Y.V. Rajyalakshmi Rao | 191-198 | | English |
| 50 | कालिदासविरचित कुमारसम्भवमहाकाव्ये<br>कविताकला<br>के. शेखर् | 199-201 | | Sanskrit |
| 51 | विशिष्टाद्वैतवेदान्तानुसारेण<br>श्रीमद्भगवद्गीतास्थयोगाभ्यासविधिविषयकाध्यायस्य<br>स्वरूपम्<br>डा. सुदर्शनन् एस् | 202-203 | | Sanskrit |
| 52 | न्यायदर्शने ईश्वरवादः<br>डा. रामचन्द्रशर्मा | 204-207 | | Sanskrit |

National Journal of Hindi & Sanskrit Research

National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2020; 1(29): 121-123
© 2020 NJHSR
www.sanskritarticle.com

डा.रामचन्द्रशर्मा
सहाचार्यः, न्यायवैशेषिकविभागे,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृत-
विश्वविद्यालयः, दिल्ली.110016

Correspondence:
डा.रामचन्द्रशर्मा
सहाचार्यः, न्यायवैशेषिकविभागे,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृत-
विश्वविद्यालयः, दिल्ली.110016

# न्यायवैशेषिकदर्शनयोर्मनस्स्वरूपविमर्शः

डा. रामचन्द्रशर्मा

भारतीयदर्शनं मूलतः परमपुरुषार्थं मोक्षमेव प्रधानलक्ष्यतया स्वीकृत्य प्रमेयपदार्थविवेचनाय सम्प्रवर्तते। प्रमेयपदार्थेषु आत्मैव परमप्रमेयतया स्वीकृतमस्ति। तथा हि श्रुति –

**आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः, आत्मनो वा अरे दर्शनेन श्रुत्या मत्या विज्ञानेनेदं सर्वं विज्ञातम्।**[1] इति

अत्र श्रुतौ आत्मदर्शनं अधिकृत्य श्रवणादीनि विधीयन्ते। तत्र श्रवणादीनाम् अनुष्ठानं कथं करणीयम्, इत्यत्रोक्तम् –

**श्रोतव्यो श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः।**
**मत्वा च सततं ध्येय एते दर्शनहेतवः।।**[2] इति

तथा च श्रवणमनननिदिध्यासनपूर्वकम् आत्मदर्शनमेव परमपुरुषार्थमोक्षसाधनं भवति इति विज्ञेयम्। मननं च न्यायचर्चारूपम् । तद्यथोक्तम् –

**न्यायचर्चेयमीशस्य मननव्यपदेशभाक्।**
**उपासनैव क्रियते श्रवणानन्तरागता।।**[3] इति

मननपूर्वकम् आत्मसाक्षात्कारे मनःपदवाच्यं अन्तःकरणमेव हेतुः। वस्तुतः बन्धमोक्षौ प्रति मन एव कारणं आस्तीति विज्ञेयम्। तथा चोक्तम् -

**मन एव मनुष्याणां कारणं बन्धमोक्षयोः।**
**बन्धाय विषयासक्तं मोक्षे निर्विषयं स्मृतम्।।**[4] इति

**"चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः"**[5] इति पर्यायाः। ज्ञानमात्रं प्रति मनसः कारणता बोध्या। तथाहि – **"आत्मा मनसा युज्यते मन इन्द्रियेण इन्द्रियमर्थेन"**[6] इति हि ज्ञान-कालीना वस्तुस्थितिः। तथा च अर्थसन्निकृष्टेन्द्रियसंयुक्तमनःसंयोगेन आत्मनि ज्ञानमुपजायते। तच्च मनः गुणवत्त्वात् क्रियावत्त्वाच्च द्रव्यं इति अवधेयम्। तल्लक्षणं कुर्वता तर्कसंग्रहकारेण समुदीरितम् –

**"सुखाद्युपलब्धिसाधनमिन्द्रियं मनः । तच्च प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यञ्च"।**[7] इति न्यायसिद्धान्तमुक्तावलीकारोप्याह –

**साक्षात्कारे सुखादीनां करणं मन उच्यते।**
**अयौगपद्याज्ज्ञानानां तस्याणुत्वमिहोच्यते।।**[8] इति

बाह्येन्द्रियैरगृहीतसुखादिग्राहकान्तराभावादेव अन्तःकरणं मनः स्वीकार्यम्। अत्रानुमानं भवति – "सुखादिसाक्षात्कारः, सकरणकः, जन्यसाक्षारत्वात्, चाक्षुषसाक्षात्कारवत्"इति अनेनानुमानेन मनसः करणत्वसिद्धिर्जायते। तथा च सुखादीनां असमवायिकारणसंयोगाश्रयतया मनसःसिद्धिर्ज्ञेया । तच्च मनः अन्तःकरणं परमाणुरूपं प्रत्यात्मनियतं नित्यं द्रव्यम् इति न्यायसिद्धान्तः।

अत्रविषये केचिन्मनसो विभुत्वं, केचिच्च मध्यमपरिणामत्वम् अङ्गीकुर्वन्ति। तन्मतनिरसनाय



रामचन्द्र शर्मा

| | | | | |
|---|---|---|---|---|
| | डा.विरेन्द्र कुमार षडङ्गी | | | |
| 20 | Jain Concept of Knowledge (Pramāṇa): Some Observations<br>Divakar Mohanty | 71-76 | | English |
| 21 | वर्णाश्रमविषये स्वामिवर्याणां विचारः<br>डॉ. मुकेश कुमार डागरः | 77-79 | | Sanskrit |
| 22 | गोतत्त्वस्य परिचयः<br>डॉ. नानूराम जाटः | 80-83 | | Sanskrit |
| 23 | स्वरभेदादर्थभेदः<br>D.Phani Yagneswara Yajulu | 84-87 | | Sanskrit |
| 24 | नारी अस्मिता और कर्त्तव्य का अंतरद्वन्द्व<br>डॉ. सुधीर कुमार शर्मा | 88-92 | | Hindi |
| 25 | भारतीयदर्शनेषु प्रत्यक्ष-विमर्शः<br>डॉ. दयालसिंह पँवार | 93-94 | | Sanskrit |
| 26 | पूर्वोत्तर की आदिवासी कहानियां : विविध सामाजिक-बोध<br>डॉ. अनीता मिंज | 95-100 | | Hindi |
| 27 | नैषधीयचरितेऽण्तद्धितप्रत्ययान्तपदानां प्रयोगः<br>डा. प्रभासिनी गौड | 101-109 | | Sanskrit |
| 28 | कर्मादिकारकेषु कारकान्तरविवक्षा<br>Pradip Mandal | 110-114 | | Sanskrit |
| 29 | प्रणयप्रसादनमहाकाव्यस्योपरि प्राचीनकवीनां प्रभावः<br>कादम्बिनी मिश्रः | 115-117 | | Sanskrit |
| 30 | श्रीमद्भागवते निःश्रेयसतत्त्वविमर्शः<br>डॉ. कृष्णचन्द्रकविः | 118-120 | | Sanskrit |
| 31 | न्यायवैशेषिकदर्शनयोर्मनस्स्वरूपविमर्शः<br>डा. रामचन्द्रशर्मा | 121-123 | | Sanskrit |




रामचन्द्रशर्मा

I2OR Impact Factor : 3.015

ISSN : 2395 - 5104

# शब्दार्णव Shabdarnav

*International Peer Reviewed Referred Journal of Multidisciplinary Research*

Year 7 Vol. 14, Part-IV July-December, 2021

Scientific Research
Educational Research
Technological Research
Literary Research
Behavioral Research

Editor in Chief
DR. RAMKESHWAR TIWARI

Executive Editors
DR. KUMAR MRITUNJAY RAKESH
MR. RAGHWENDRA PANDEY

Published by
SAMNVAY FOUNDATION
Mujaffarpur, Bihar

- फणीश्वरनाथ 'रेणु' की कहानियों में स्वातन्त्र्योत्तर भारत का बदलता परिवेश — 186–188
  *पसन्द पाल*
- काव्यशास्त्र में वर्णित शब्दशक्तियों का स्वरुप व वर्णन — 189–192
  *स्नेहलता द्विवेदी*
- धर्ममीमांसा — 193–198
  डॉ0 कैलाश चन्द्र भट्ट
- नृ–यज्ञ का शास्त्रीय एवं व्यवहारिक महत्त्व (गृह्यसूत्रों के विशिष्ट सन्दर्भ में) — 199–203
  *अरुप सरकार*
- वर्त्तमान सामाजिक परिवेश में नौकरी पेशा महिलाओं की प्रमुख चुनौतियाँ — 204–205
  *डॉ0 संगीता कुमारी*
- भारतीय ज्ञान परम्परा के संवर्द्धन में भोजराज का योगदान — 206–212
  *जितेन्द्र*
- शुद्धिक्रिया त्राटक पर साहित्यिक व प्रायोगिक अध्ययन — 213–217
  *महेन्द्र कुमार शर्मा*
- ऋग्विधानम् तस्य कतिपयानां मातृकाणां परिचयश्च — 218–219
  *विकाशचन्द्रपाण्डेयः*
- शैशवावस्था में आहार का महत्त्व — 220–222
  *डॉ0 रचना कुमारी*
- श्रीमद्भागवतमहापुराणे सृष्टिविमर्शः — 223–228
  *डॉ0 रामचन्द्र शर्मा*
- नास्तिक दर्शनों में आत्मा की समीक्षा — 229–232
  *मर्रि दयानन्द रेड्डी*
- ज्योतिषशास्त्रदृष्ट्या राशीनां मनोविज्ञानोक्तव्यक्तित्त्वपरकमध्ययनम् — 233–236
  *कपिलदेवः*
- भवन निर्माण में ब्रह्मस्थान एवं मर्मस्थान की उपयोगिता — 237–240
  *डॉ0 उमाशंकर व रघुनाथ भट्ट*
- वेद अर्थ एवं महत्त्व, वैदिक साहित्य में राष्ट्र की अवधारणा — 241–242
  *डॉ0 नीतू सोनी*
- **THE VALUE OF THE FIVE PRECEPTS OF BUDDHISM IN COMMUNICATION** — 243–245
  *Phung Minh The*
- **Concept of Bhakti in Abhnavagupta's Bhagavadgītārthasaṅgraha** — 246–249
  *Partha Sarathi Sil*
- **Mindfulness and its Application** — 250–251
  *Dr. H. V. Goswami*
- **Post COVID-19 Enhancing People's Health In The Modern Digital Realm By Inheriting Ancient Indian Wisdom of Yoga** — 252–255
  *Komal & Rudresh Kumar Singh*

# श्रीमद्भागवतमहापुराणे सृष्टिविमर्शः

• डॉ. रामचन्द्र शर्मा

"भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा"। संस्कृतसंस्कृत्योः परस्पराश्रयभावः। संस्कृतं विना न संस्कृतेः किमपि स्वरूपं परिज्ञातुं शक्यं, तस्याः संस्कृतप्रयुक्तविज्ञानप्रकाशान्तर्निविष्टत्वात्। आचाररूपिसंस्कृतिं विना च संस्कृतस्य सम्यक्स्वरूपाधिगमासम्भवात्। अत एव "आचारहीनं न पुनन्ति वेदाः[1]" इति हि समुद्घोषः। सर्वोप्याचारः संस्कारमूलकः, संस्काराश्च यथायोग्यं चातुर्वर्ण्यसंस्कृतिसङ्ग्राह्याः। संस्कारैरेव संस्कृतम्। संस्कारैरेव संस्कृतिः। ते च तत्तद्गुणाधानहेतवः संस्कृतसंस्कृत्युभयस्वरूपसंग्रहणसामर्थ्याधायकाः। तैरेव लौकिकप्रमेयप्रत्यासत्ति-पूर्वकालौकिकप्रमेयप्रत्यासत्तिसामर्थ्यं समायाति। अतः पौराणिकीसंस्कृतिरेव भारतवर्षस्य सम्प्रतिष्ठा।

वेदविहितो धर्मः पुराणाख्यायिकाभिः तत्त्वविज्ञानविस्फोरणपुरस्सरं सामाजिकपृष्ठभूमौ सम्प्रकाश्यते। अत एवोक्तम्–

"इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति॥ इति।

वेदप्रहारः संस्कारह्रासकृत एव। तथा हि, यदि सम्यगाचारपूर्वकगुरुमुखाधीनव्याकरणन्यायादिशास्त्राणि नाधीयन्ते तदा न सम्यक्संस्कृतोच्चारणसामर्थ्यम्। प्रमेयविज्ञानशून्यस्य तु कथैव नास्ति। तथा ह्युक्तम् –

"यस्य देवे परा भक्तिः यथा देवे तथा गुरौ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः॥[2]

प्रमेयविज्ञानाभावे च यागादिरूपधर्मस्य सम्यगनुष्ठानाभावात् पर्जन्यादिक्रमविच्छेदात्प्रकृतिविच्छोभः सर्वविधलोकहानिश्चातः सम्यक्कर्मानुष्ठानाय प्रमेयतत्त्वविज्ञानमपरिहार्यम्। यथा भौतिकप्रयोगविज्ञानं तत्त्वज्ञैरेवानुष्ठातुं शक्यं तथैव यागादिरूपभौतिकाभौतिकोभयात्मकक्रियाविज्ञानमपि तत्त्वज्ञैरधिकारिभिरेव अनुष्ठातुं शक्यते नान्यैः। कर्त्तृकर्मसाधनवैगुण्यात् सर्वत्र सम्यक्फलनिष्पत्त्यभावो दृश्यते। तद्यथा भोजनफलनिष्पत्तये सम्यक्कर्ता, तस्य सम्यक्कर्म, सम्यक्साधनानि समपेक्ष्यन्ते। यथा वा आरोग्यफले ज्ञाताभिषक्, सम्यगौषधविज्ञानं, सम्यगनुष्ठानं परमावश्यकम्, तथैव वैदिकलौकिकसकलकर्मसु कर्तृकर्मसाधनवैगुण्यं न स्यात्तदर्थं प्रमेयविज्ञानं यथाविधि समनुष्ठेयमेव।

प्रमेयविज्ञानञ्च सृष्टिविज्ञानाधीनं, सृष्टिविज्ञानञ्चात्मविज्ञानाधीनम्। अत एव श्रुतिर्निर्दिशति "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः। आत्मनो वा अरे दर्शनेन श्रुत्या मत्या विज्ञानेनेदं सर्वं विज्ञातम्।[3]"

अत्र आत्मदर्शनमनूद्य श्रवणानि विधीयन्ते। यावदात्मविज्ञानं श्रवणादीन्यनुवर्त्तन्ते। "वादे वादे जायते तत्त्वबोधः" वादश्च तत्त्वबुभुत्सोः कथारूपः। अत एव ऋषिपरम्परा तत्तदारण्यकाख्यानैर्भूयो भूयः ब्रह्मविज्ञानं विवृण्वन्ती पुराणेषु परिदृश्यते। तत्र सृष्टिविज्ञानमात्मविज्ञानमूलम्, अतो ब्रह्मात्मदर्शनविज्ञानेन सृष्टिविज्ञानं सर्वत्र पुराणेषु समाख्यातम्।

तदस्मिन्नेव क्रमे शब्दमयभगवन्मूर्तिरूपस्य सर्वातिशायिप्रामाण्येन विराजमानस्य श्रीमद्भागवतमहापुराणस्य प्रशस्तालोके सृष्टिप्रक्रियाविमर्शः सम्प्रस्तूयते।

तत्र तृतीयस्कन्धस्य पञ्चमेऽध्याये योगेश्वरजगद्गुरुगुणानुकीर्तनश्रवणाभिलाषाव्याजेन विदुरः मैत्रेयं जिज्ञासामुपस्थापयति –

"करोति कर्माणि कृतावतारो यान्यात्मतन्त्रो भगवांस्त्र्यधीशः।